# શ્રી શિવમાનસપૂજા

રત્નૈઃ કલ્પિતમાસનં હિમજલૈઃ સ્નાનં ચ દિવ્યામ્બરં
નાનારત્નવિભૂષતં મૃગમદામોદાંકિતં ચન્દનમ્ ।
જાતીચમ્પકબિલ્વપત્રરચિતં પુષ્પં ચ ધૂપં તથા
દીપં દેવ દયાનિધે પશુપતે હૃત્કલ્પિતં ગૃહ્યાતામ્ ॥ ૧ ॥

સૌવર્ણે નવરત્નખણ્ડરચિતે પાત્રે ઘૃતં પાયસં
ભક્ષ્યંપંચવિધં પયોદધિયુતં રમ્ભાફલં પાનકમ્ ।
શકાનામયુતં જલં રુચિકરં કર્પૂરખણ્ડોજ્જ્વલં
તામ્બૂલં મનસા મયા વિરચિતં ભક્તયા પ્રભો સ્વીકુરુ ॥ ૨ ॥

છત્રં ચામરયોર્યુગં વ્યજનકં ચાદર્શકં નિર્મલં
વીણાભેરિમૃદંગકાહલકલાગીતં ચ નૃત્યં તથા
સાષ્ટાંગ પ્રણતિઃ સ્તુતિર્બહુવિદ્યા હ્યેતત્સમસ્તં મયા
સંકલ્પેન સમર્પિતં તવ વિભો પૂજાં ગૃહાણ પ્રભો ॥ ૩ ॥

આત્મા ત્વં ગિરિજા મતિઃ સહચરાઃ પ્રાણાઃ શરીરં ગૃહં
પૂજા તે વિષયોપભોગરતના નિદ્રા સમાધિસ્થિતિઃ ।
સંચારઃ પદયો પ્રદક્ષિણવિધિઃ સ્તોત્રાણિ સર્વા ગિરો
યદ્યત્કર્મ કરોમિ તત્તદખિલં શમ્ભો તવારાધનમ્ ॥ ૪ ॥

કરચરણકૃતં વાકકાયજં કર્મજં વા
શ્રવણનયનજં વા માનસં વાપરાધમ્ ।
વિહિતમવિહિતં વા સર્વમેતત્ક્ષમસ્વ
જય જય કરુણાબ્ધે શ્રી મહાદેવ શમ્ભો ॥ ૫ ॥

ઇતિ શ્રીમચ્છંકરાચાર્યવિરચિતા શિવમાનસપૂજા સમાપ્તા ॥